**स्वर्णकेतकी** स्त्री स्वर्णमिव पीतत्वात् केतकी। पीतकेतक्याम् राजनि०। तत्पुष्पादिगुणाः "केतकीकुसुमं वर्ण्यं केश-दौर्गन्ध्यनाशनम्। हेमाभं मदनोन्मादवर्द्धनं सौख्यकारि च। तस्याः स्तनोऽतिशिशिरः कटुः पित्तकफा-पहः। रसायनकरो वर्ण्यो देहदार्ढ्यकरः परः" राजनि०।

**स्वर्णक्षीरी** स्त्री स्वर्णमिव पीतत्वात् क्षीरं निर्यासो यस्याः गौरा० ङीष्। ओषधिभेदे सा च हिमालये जायते। "हेमवर्णा रसस्तस्या हिमवद्भूमिसम्भवा। सा नाग-जिह्विकाकारा तन्मूलं वाजिजौषधम्। स्वर्णक्षीरी हिमा तिक्ता कृमिपित्तकफापहा। मूत्रकृच्छ्राश्मरी शोथदाहज्वरहरा परा" राजनि०।

**स्वर्णगैरिक** न० स्वर्णमिव पीतं गैरिकम्। (वर्णकमाटि) पदार्थभेदे राजनि०।

**स्वर्णग्रीवा** स्त्री नदीभेदे। "या निःसृता पूर्वभागात् तस्मात् गिरिवरात् (नाटकशैलात्) नदी। स्वर्णग्रीवेति विख्याता सा गङ्गादशफले" कालिकापु० ८२ अ०।

**स्वर्णचूड** पुंस्त्री० स्वर्णमिव पीतत्वात् चूडा यस्य। चाष-पक्षिणि जटा० स्त्रियां ङीष्। [जातमात्रे त्रि०।

**स्वर्णज** न० स्वर्णात् जायते जन–ड। १वङ्गे हेमच० २स्वर्ण-

**स्वर्णजीवन्ती** स्त्री० स्वर्णमिव पीतत्वात् जीवन्ती। पीत-पुष्पजीवन्त्याम् राजनि०।

**स्वर्णदी** स्त्री स्वर्णं द्यति अपसारयति तुल्यवर्णत्वात् दो–क गौरा०ङीष्। १वृश्चिकाल्याम् राजनि०। ६त० णत्वम्। २गङ्गायाम् अमरः। [२चित्रकवृक्षे च त्रिका०।

**स्वर्णदीधिति** पु०स्वर्णमिव भास्वरा दीधितिरस्य। १अग्नौ,

**स्वर्णद्रु** पु०स्वर्णमिव पुष्पे पीतो द्रुः। आरग्वधे राजनि०।

**स्वर्णपक्ष** पु० स्वर्णमिव पीतः पक्षोऽस्य। गरुडे त्रिका०।

**स्वर्णपाटक** पु०स्वर्णं पाटयति पट–णिच्–ण्वुल्। टङ्कणे (सोहागा) शब्दर०।

**स्वर्णपुष्प** पु० स्वर्णमिव पीतं पुष्पमस्य। १चम्पके २आरग्वधे पुंस्त्री० राजनि० स्त्रीत्वे ङीप्। सा च ३स्वर्णकेत-क्याञ्च राजनि०। ४सातलायाम् ५कलिकारी स्त्री राज-नि० टाप्। [सुवर्णकदल्याम् राजनि०।

**स्वर्णफला** स्त्री स्वर्णमिव पीतं फलमस्याः। (चांपाकला)

**स्वर्णवणिज्** पु० ६त०। सुवर्णवणिजि जातिभेदे।

**स्वर्णभृङ्गार** पु० स्वर्णमिव स्वर्णमयो वा भृङ्गारः। १पीत-भृङ्गराजे राजनि०। २स्वर्णमयकलशभेदे च।

**स्वर्णमाक्षिक** न० स्वर्णमिव पीतं माक्षिकम्। स्वनामख्याते उपधातुभेदे "किञ्चित् सुवर्णसाहित्यात् स्वर्णमाक्षिक-मीरितम्। उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम्। तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्। किन्तु तस्यानुकल्पत्वात् किञ्चिद्धीनगुणास्ततः। न केवलं स्वर्ण-गुणा वर्त्तन्ते स्वर्णमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्य-न्येऽपि गुणास्ततः। सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम्। चक्षुष्यं वस्तिरुक्कण्ठपाण्डुमेहविशोदरम्। अर्शःशोथं विषं कण्डुं त्रिदोषमपि नाशयेत्"। अशुद्ध-स्वर्णमाक्षिकस्य दोषमाह 'मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान्। मालां तथैव व्रण-पूर्विकाञ्च कुर्यादशुद्धं खलु माक्षिकञ्च"। तद्दोषशान्त्यर्थं शोधनमाह "माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च। मातुलुङ्गद्रवैर्वाथ जम्बीरस्य द्रवैः पचेत्। चालयेल्लौहजे पात्रे यावत् पात्रं सुलोहितम्। भवेत्ततस्तु संशुद्धं स्वर्णमाक्षिकमीरितम्"। तन्मारणं यथा "कुलत्थस्य कषा-येण घृष्ट्वा तैलेन वा पुटेत्। तक्रेणैवाजमूत्रेण म्रियते स्वर्णमाक्षिकम्" भावप्र०।

**स्वर्णयूथी** स्त्री स्वर्णमिव पीता यूथी। पीतयूथिकायाम् शब्दच०

**स्वर्णलता** स्त्री स्वर्णमिव पीता लता। ज्योतिष्मत्यां राजनि०

**स्वर्णवर्णा** स्त्री स्वर्णमिव वर्णो रूपमस्याः। १हरिद्रायाम् राजनि०। २सुवर्णवर्णे त्रि० ३हेममूल्यज्ञापके वर्णे च।

**स्वर्णवल्कल** पु० स्वर्णमिव पीतं वल्कलमस्य। शोनाकवृक्षे शब्दच०।

**स्वर्णवल्ली** स्त्री स्वर्णमिव पीता वल्ली। लताभेदे "स्वर्णवल्ली रक्तफला काकायुः काकवल्ल्यपि। शिरः-पीडा त्रिदोषघ्नी दुग्धदात्री तु सा मता" राजनि०।

**स्वर्णशेफालिका** स्त्री स्वर्णमिव पीता शेफालिका। १पीत-शेफालिकायाम्। २आरग्वधे राजनि०।

**स्वर्णाङ्ग** पु० स्वर्णमिवाङ्गं पुष्पं यस्य। १आरग्वधे राजनि० २पीतवर्णदेहयुते त्रि० स्त्रियां ङीष्।

**स्वर्णारि** पु० ६त०। गन्धके तस्य स्वर्णमारकत्वात्तथात्वम्।

**स्वर्णुली** स्त्री स्वर्णं तद्वर्णं लीयते पुष्पेऽत्र ली–आधारे क्विप् पृषो०। स्वर्णुली हेमपुष्पी च स्वर्णपुष्पाध्वजा तथा। सा कषाया कटुः शीता व्रणहा परिकीर्त्तिता" राजनि० उक्ते लताभेदे। [यति ते अस्वर्त्तत् त।

**स्वर्त्त** गतौ सक० दुःखेन जीवने अक० चु० उ०सेट्। स्वर्त्त-

**स्वर्द्द** प्रीतौ अक० प्रीणने लेहने च सक० भ्वा०आत्म० सेट्।